MSS No. 169 Subject Literature

Name of MSS कुमार सम्भव टीका

Author — —

Period — — Folios 10

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios

169

(15)

169

ॐ श्री गणेशाय नमः ॐ गुरुवे नमः सरस्वत्यै नमः ॐ मातापितृभ्यां जगतो नमो वामार्द्धजानये सद्यो दक्षिणदृ
क्पातसंकुचद्वामदृष्टये १ अंतरायतिमिरोपशांतये शांतपावनमचिंत्यवैभवम् तं नरं वपुषि कुंजरं मुखे
मन्महे किमपि तुंदिलं महः २ शरणं करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यं करुणामसृणैः कटाक्षपातैः कुरु मामंब
कृतार्थसार्थवाहं ३ इहान्वयमुखेनैव सर्वं व्याख्यायते मया नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ४ तत्र भगवान्का
लिदासः कुमारसंभवाख्यं काव्यं चिकीर्षुः आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति शास्त्रकारवचनात्
वक्ष्यमाणकथानुगुणं वस्तु निर्दिशन् अस्तीति उत्तरस्यां दिशि इत्यनेन अस्य देवभूमित्वं सूचितं देवतात्मा
अधिष्ठाता यस्य स देवतात्मा अनेनास्य वक्ष्यमाणमेनामेनकापरिणय पार्वतीजननादिव्यवहारत्वं सूचितं
महितो अस्त्रस्य पूत्राय यत्नि सर्वे वदंत्यस्यामितिहिमम् ईर्षिवृद्ध्यास्त्र स्त्ररुक् हिमस्यालयः स्थानमिति हिमा
लयो नाम हिमालय इति प्रसिद्धः अधिको राजा अधिराजो राजा नामधिकः स्वयम् नगाः तिर्नगाः अचलास्तेषा
मधिराजो नगाधिराजोऽस्ति कथंभूतं पूर्वापरौ पूर्वपश्चिमौ वारिनिधि समुद्रौ वगाह्य प्रविश्य स्थि
तः पृथिव्याः भूमेर्मानदंडः मानदिनापरिच्छेदः भावेल्युट् तस्य दंडः यद्वा मीयते अनेनेति मानः करणे
ल्युट् स चासौ दंडश्चेति तदिव दंड इव स्थितः आयामपरिच्छेदकदंड इव स्थित इत्यर्थः पूर्वापरसागरावगाहि
त्वे वस्य हिमाचलात्वात् उक्तं च ब्राह्मणे पुराणे कैलासो हिमवांश्चैव दक्षिणे वर्षपर्वतौ पूर्व
पश्चिमौ वेतावर्णवांते व्यवस्थितौ अत्र जोमयावधि व्याप्तितास्मान्मानदंडश्चोनोत्प्रेक्षणात् उपदाल

श्री
१६८
...प्रकाशेन प्रकाशेन संभवं नगसर्वज्ञस्य
लंकारसर्वस्वकारं श्रीरामरामरामराम

ॐश्रीगणेशायनमः अस्मिन्सर्गे प्रायेण वृत्तमुपजाति क्वचिदिंद्रवज्रोपेंद्रवज्रे च तल्लक्षणं स्यादिं
द्रवज्रा यदि तौ जगौ गः उपेंद्रवज्रा जतजास्ततो गौ अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुप
जातयस्ता इति १ इतः पंचभिः श्लोकैर्हिमालयं वर्णयति तत्रेन नगाधिराजत्वे निर्बाहुमाह्व य
मिति सर्वे च ते शैलाश्च सर्वशैलाः पूर्वकाले दामोदराय नमः रामकेशवाय नमः गोविंदाय नमः राम

ॐश्रीगणेशायनमः ॐ अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः पूर्वा
परौ तोयनिधी वगाह्य स्थितः पृथिव्याः इव मानदंडः १

कस्तर्वे जरत्पुराणानवके च लाः समानाधिकरणेनेति समासः यं हि वत्सं वत्सं परिकल्प्य ^
विधाय दोहदक्षे दोहनसमर्थे मेरौ दोग्धरि स्थिते सति यस्य च मा रामराम रामराम राम

कु. टी.
२

वेनभावलक्षणामिति भावलक्षणे सप्तमी पृथूपदिष्टां पृथुना राज्ञा वैन्येनोपदिष्टां इहदुहन्ता
याप्रदर्शितां धरित्रीं गोरूपधारिणीमिति शेषः गौर्भूत्वा तु वसुंधरेति विष्णुपुराणात् ब्र
कल्पितत्वेति कर्मत्वं भास्वन्ति च भास्वन्ति प्रभावन्ति द्युतिमन्ति औषधिविशेषणं चैतत् नपुंसके

यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरि
त्रीम्

नेत्यादिनानपुंसकैकशेषः रत्नानि मणीन् जातिश्रेष्ठवस्तूनि च रत्नं श्रेष्ठमणाविति विश्वः
जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते इति मम हौषधीश्च तेजोवन्तोऽ महतीः ओष
धीनपरिणताः इति शेषः ताः वीरपरिणामिनीरिति विष्णुपुराणात् दुदुहुः ननु वत्सस्थानीयं

जकत्वे विशालानां पंचभिर्हेतुभिः वर्षति सामंन्याः समग्रिरिति वत् तत्समर्थ्या वर्णनं करोति तेन व्यपदेशः देहे स्थिरे तत्र तत्र पि केत्रिभिः प्रावविवक्षायां परस्मैपदं अनन्नार्थे प्रमाणां कृपते दुग्धानमेर्वसुंधराको षधीश्चैव मासंति रत्नानि विविधानि च वत्सो हिमालयस्त्वासीद्दोग्धा मेरुर्महागिरिरिति एतेन वत्सस्य मातुः प्रेमास्पदत्वाद्वत्सलत्वं रम्यत्वं गम्यते तथा च नगस्य रत्नविशेषाभोक्तृत्वात्र नगाधि राजत्वमस्य युक्तमिति भावः अत्र हिमवद्वर्णनस्य प्रकृतत्वात्तद्गतौषधीरत्नानामविशकृत्वात्तेषां ॥२॥

अनंतरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातं
एको हि दोषो गुणसन्निपाते निमज्जतींदोः किरणेष्विवांकः ॥३॥

दोह्नक्रियारूपसमानधर्मसंबंधः औपम्यत्वाच्च एवं प्राकरणिकविषयतुल्ययोगितानामालंकारः तदुक्तं प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः औपम्यं गम्यते यत्र समता तुल्ययोगितेति न चात्र रूपकपरिणामालंकारः प्रांकायां तेषामारोप्यमूलकत्वात् हिमाचलादिषु वत्सदोग्धृत्वादीनामागमसिद्धेनारोप्यमाणत्वाभावादिति ॥२॥ अनंतेति ननु हिमदोषप्रवत्तस्यापतनम

कुमा ३

देभूतं तस्मिन्नगस्य भावः सौभाग्यमुद्दमनगाति ध्वंतो पूर्वपदस्य चेत्युभयपदवृद्धिः तदिलं पत्नी जितसौभाग्यविलो
पितौ दर्पविघातकं न जातं नाम तत् तथा हि एको दोषो गुणानां सन्निपाते गुणसंघाते इंदोः किरणेष्वं
कइव निमज्जति अप्रतीतो भवतीत्यर्थः न हि सर्वो दोषस्तत्र बहुगुणाभिभावकः एव किं तु कश्चिदेवं
कलंकादिव द्गुणैरभिभूयते च अन्यथा समस्तवस्तुहानिप्रसंगादिति भावः अत्रोपमानुप्रासितोर्था
तरन्यासोलंकारो ज्ञेयः सोर्थांतरन्यासोलंकारो ज्ञेयः सोर्थांतरन्यासो यत्र वस्तु प्रस्तुत्य किंचन तत्साध

यश्चाप्सरोविभ्रममंडनानां संपादयित्रीं शिखरैर्विभर्त्ति
वह्लाहकाछेदविभक्तिरागमकालसंध्यामिव धातुमत्तां

चतसर्थांतरन्यासो ऽत्रास्य वस्तुनेऽसत्याहृदंडीउ यदृत्तिकिंचेति चार्थः यो हिमाद्रिरप्सरसां विभ्रममंडना
नि लीलालंकरणानि शृंगारचेष्टा विभ्रमो विपरीतविन्यासः विभ्रमस्त्वरया काले भूषास्थानविपर्यय
यः इति दशरूपके तेन मंडनानि तेषां संपादयित्रीं एकदा तु रागदर्शिन्योऽप्सरसः संध्याभ्रमेण नव
साधनाय त्वरयंत्य इति भावः इति सैवोत्प्रेक्षालंकारो व्यज्यते कर्त्री कर्मणः कर्त्रीति कर्मणि षष्ठी ऽवारि

यस्याइति धातुमात्रं नित्ययोगे न तु पूर्वस्य भावो धातुमत्ता ताम् न तु धातुयोगित्वं मिति संबंधो वाक्यार्थः
समासस्त्वर्हे नैषु संबंधानमिति वचनात् लक्षणया तु नित्यानुबंधित्वं धामत्वमित्यर्थः। अकालसं
ध्यामनिपतन्तकाल संध्यासु संध्यामिव पिशावरै विभर्ति धत्ते अनेन स्वच्छत्वात् जातिवाचित्वात् जा
त्पुंस्त्वं ४ पदमिति यस्मिन्नद्रौ किराताः तुषारस्रुतिभिर्हिमस्यंदैर्धौतं क्षालितं रक्तं शोणितं य
स्य तत्तथोक्तम् अत एवादृश्यमानमित्यर्थः हतद्विपायेषां हतद्विपानाम् केसरिणां सिंहानां प

पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वापि हतद्विपानाम् विदंति मार्गं नखरंध्रमुक्तैर्मुक्ताफलैः
केसरिणां किराताः ५

दं पादहतेर्यस्या नम् अदृष्ट्वापि नखरंध्रे नखछिद्रेभ्यो मुक्तैः त्यक्तैः मुक्ताफलैर्मार्गं विदंति जानंति
अत्र तु व्याघ्राः हस्तिघातेनो गजेंद्रान्ध मुक्ताकरा इति भावः। केशरिद्रुजीमन्त वराहतो शोभमहत्सः
किंपु... तु इव वैश्यजातिमुक्ताफलानि प्रथितानि लोकेव म... रिषात्तुभात्मुद्वं वंते ५ ग्रामसर्वा
मिति ...णिमादिभिर्युक्ताः सिद्धाः देवयोनिविशेषः विद्याधरो गुह्यकः सिद्धोमृतोमी देवयोनयः

तुंबं येसात्त्काचीनौनितंबयोरितिविश्वः आङ्मर्यादाभिविध्योरिति अव्ययीभावः संचरतां घनानां
मेघानामधःसानुनिमेघमंडलादधस्तात्टानिगतांप्राप्तामद्वितीयाश्रितेत्यादिनासमासः छाया
मनातपं निषेव्य छायात्वर्कप्रियाः कांतिः प्रतिबिंबमनातप इत्यमरः वृष्टिभिरुद्वेजिताः क्लेशि
ताः संतः उद्वेगात्तिमन्तेषुमयेचपरंगामनीतिराष्ट्रीयैव यस्याद्रिमाद्रेरातपवंतिसातपानिशृंगाणि

आमेखलं संचरतां घनानां छायामधःसानुगतां निषेव्य उद्वेजिता वृष्टिभिराश्रयंते शृंगाणि
यस्यातपवंति सिद्धाः ६ न्यस्ताक्षरा धातुरसेन यत्र भूर्जत्वचः कुंजरबिंदुशोणाः व्रजंति विद्या
धरसुंदरीणामनंगलेखक्रिययोपयोगम् ७

णि आश्रयंते अतिमेघमंडलमेतत्तोन्नतामितिभावः ६ धातोः दारवाचां इति यत्र हिमाद्रेर्धा
तुरसेन सिंदूरादिद्रवेण गुणरागे द्रवे रस इत्यमरः न्यस्ताक्षराः लिखितवर्णाः अतएव कुंजरबिं
दुशोणाः कुंजरस्य ये बिंदवः कायापचये विशेषभाविनः पद्मकाख्याः पद्मकं बिंदुजालकमि
त्यमरः अतएव शोणाः लिखितेभागेषु विशिष्टशोभाः भूर्जत्वचो भूर्जपत्रत्वचः भूर्जो पत्रो भूर्जो मृदुत्वक्

ङ्गियया कामम् अव्यंजकलेखकरणेनेत्यर्थः उपयोगमुपकारं व्यंजयति दिव्यांगनानां विहारयोग्या-
यं शैल इत्याशयः ॥७॥ य इति यो हिमाद्रिर्दरी गुहा सैव मुखं तस्मादुत्थेन उत्पन्नेन प्रापत-
वसगैवः इक प्रत्ययः समीरणेन वायुना कीचकाः वेणुविशेषाः वेणवः कीचकास्ते स्युर्ये स्वनन्त्य-
निलोद्धता इत्यमरः तेषां रंध्रभागान् छिद्रप्रदेशान् पूरयन् धमयन् वांशिको विमुखमारुतेन वंशर-
ंध्राणि पूरयतीति प्रसिद्धं उद्गास्यतां देवयोनित्वादुच्चैर्गान्धारग्रामेण गानं करिष्यताम् उक्तं च नारदेन

यः पूरयन् कीचकरंध्रभागान् दरीमुखोत्थेन समीरणेन
उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगंतुम्

षड्जमध्यमनामानौ ग्रामौ गायंति मनुष्याः न तु गांधारनामानं स लभ्यो देवयोनिभिरिति किन्नराणां देव-
गायकानां तानो नाम स्वरांतरप्रवर्तको नादः स्थिति प्रवृत्त्यादिहेतुः रंध्रापरनामा वंशवाद्यप्रसाध्यः प्र-
धानमूर्च्छनाः स्वरविशेषः तानस्तु प्रास्वरोऽनंत इत्यभिनवगुप्तः मानं येयं स्वरं प्रोगात्वं तं वंशेन तस्य

नेरे

कु॰टी ५

चाजाद्यवयविनः पुंसो रूपाणां पङ्क्तिरिति दिष्टे हिमाद्रा विन्यलं बहुवचनात् कपोलेति यत्र हिमाद्रौ करि
भिः कपोलयो कंडूः गंडस्थल कंडू विनेतुमपनेतुं विघट्टितानां कषितानां सरलद्रुमाणां देववदारु विशे
षाणां संबंधिस्रुतानि करिकपोलकाषस्रुतानि क्षीराणि यानि तेषां भावः स्रुतक्षीरता तया हेतुना
प्रसूतः उत्पन्नो गंधः परिमलः सानूनि सुरभिकरोति सुगंधीकरोति अभी शीकरोतित्यभूततद्भावे
तद्भावे इति च्विप्रत्ययः ईकारश्चेकारः ९ तेनास्य गजाकरत्वं गम्यते पौंत्र नागजापुर्वैदे हिमवद्गिरिं कौमल

कपोलकंडूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणां यत्र स्रुतक्षीरतया प्रसूतः सानूनि गंधः सु
रभीकरोति ९ वनेचराणां वनितासखानां दरीगृहोत्संगनिषक्तभासः भवंति यत्रौषधयो रजन्याम
तैलपूराः सुरतप्रदीपाः

यागजानां प्रभवानगा इति ९ वनेचराणामिति यत्र हिमाद्रौ दर्यः कंदरा एव गृहास्तेषामुत्संगेषु मध्यंतर
रेषु निषक्ताः संक्रांताः भासो याभिस्ताः प्रगल्भावौषधीषु तेजोनिधायपरिविरस्ति याती त्यागमः औष
धयस्तृणज्योतीषि वनिताभिः सखायो वनितासखाः राजाहः सखिभ्यष्टजिटच तेषां रमणानां
मित्यर्थः वनेचरीतीति वनेचराः किराताः चरेष्टः इति टप्रत्ययः तत्पुरुषे कृतिबहुलमित्यलुक् ५

उद्वेजयतीति किन्नरा द्विविधा भवंति केचिदश्वमुखाः मनुष्यशरीराः केचिन्मनुष्यमुखाः
अश्वशरीराः यत्र हिमाद्रौ शिलीभूतं घनीभूतं हिमं यत्र तस्मिन् मार्गे अंगुलीनां पार्ष्णी
नां च भागान् प्रदेशान् उद्वेजयति व्यथयति शैत्यात् क्लेशयति अपि मार्गे श्रोणयश्च पयोधराश्च
श्रोणिपयोधरम् प्राण्यंगत्वादेकवद्भावः दुर्वहेण दुर्भरेण श्रोणिपयोधरेणार्त्ताः पीडिताः

उद्वेजयत्यंगुलीपार्ष्णिभागान् मार्गे शिलीभूतहिमेपि
यत्र न दुर्वहश्रोणिपयोधरार्त्ता भिंदंति मंदां गतिमश्व
मुख्यः ॥११॥

प्राङ्मुखीवोढुं नेरतः उपसर्गेधोर्गतिघातावितिनिर्देशात् अश्वानां मुखानीव मुखा
नि यासां ताः अश्वमुख्यः किन्नरस्त्रियः उष्ट्रमुखवत्समासः स्यात् किन्नरः किंपुरुषस्तु
रंगवदनो मयुरित्यमरः मंदां मंथरां गतिं न त्यजंति पादपीडाकरे रामरामरामराम
॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥=॥

कुसं
६

दिवाकरेति यो हिमाद्रिः दिवा दिवसे भीतं भयाविष्टमिव उलूकादिमिवेति च ध्वनिः गुहासु लीनमंध^
कारं ध्वांतं दिवा दिनं करोतीति दिवाकरस्तस्माद्दिवाकरात् दिवाविभेत्यादिनाप्रत्ययः भीमा^
र्थानां भयहेतुरित्यपादानात् पंचमी रक्षति त्रायते ननु क्षुद्रसंरक्षणमनर्हमित्याशंक्या^

दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवांधकारम्
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव ॥१२॥

क्षुद्रेऽपीति उच्चैःशिरसामुन्नतानां शरणं प्रपन्ने क्षुद्रेऽपि नीचेऽपि सतीव सज्जन इव मम
त्वं ममायमित्यभिमानोस्तीति विशेषः अलमर्थाद्धात् वशीवृत्ति रूपकाद्व्यंग्यतया
त् प्रत्ययः अर्थांतरन्यासोऽलंकारः ॥१२॥ राम श्रीराम दामोदराय नमः राम ६

लांगूलेति चमर्यो मृगविशेषः इतस्ततो लांगूलानि वालधयः पुच्छोऽस्त्री लूमलांगू
ले वालहस्तश्च वालधिरित्यमरः तेषां विक्षेपैः धूननैः विसर्पिण्यो विस्तृताः शोभाः
कांतयो येषां तैः चंद्रमरीचयः इव गौराणि एवंभूतानि तैः गौरैः करीरैः सिद्धार्थैः पुलेरी

लांगूलविक्षेपविसर्पिशोभैरितस्ततश्चंद्रमरीचिगौरैः
यस्यार्थयुक्तं गिरिराजशब्दं कुर्वंति वालव्यजनैश्च
मर्यः १३

तेषु एभिश्चेति मालतीमाधवायाम् उपमितानि सामान्यवचनैरिति समासः वालव्या
जनैः चामरैः यस्य हिमाद्रेः गिरिराजशब्दं गिरिराजसंज्ञाम् अर्थयुक्तम् अन्वर्थं कुर्वं
वंति राजानो हि छत्रचामरादि चिह्निता इति भावः भज भज गोविं भज गोविंदं मूढमते राम

कुं टी ८ यत्रांशुकेति यत्र हिमाद्रौ अंशुकाक्षेपेण वस्त्राहरणेन विलज्जितानां किंपुरुषांगनानां
किंनरस्त्रीणां यदृच्छया दैवगत्या दरीगृहद्वारेषु विलंबिबिंबाः लंबमानदेहाः जलदाः
तिरस्करिण्यो जवनिकाः भवंति ॥

यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किंपुरुषांगनानां
दरीगृहद्वारविलंबिबिंबास्तिरस्करिण्यो जलदा भवंति १४

प्रतिसीरा जवनिका स्यात्तिरस्करिणी चेत्यमरः तिरस्यतोऽन्यतिरस्करतीति तिरस्करिणी ८ जल
देष्वारोप्यमाणतिरस्करिणीत्वस्य प्रकृतोपयोगित्वात्परिणामालंकारः ॥१४॥

भागीरथीति भागीरथीनिर्झरशीकराणां गंगाप्रवाहपयःकणानां सकृन्मर्षशीकरा वोढा प्रवा
हकः वेहतत्त्वमहुः पुनः संघो वा पुण्य मरुत्संघो च संघार्थे स्यन्मङ्कुः यदमिति वैजयंतीके
पितदेवदारुः भिन्नानि विश्लेषितानि शिखंडिबर्हाणि गतिलाघवार्थे किरातैः का
टिबद्धानि येन सततपोलनः क्रमविशेषणत्रयेण शैत्यमांद्यसौरभ्याण्युक्तानि यस्याहिमा
द्रेर्वायुर्यद्वायुः अन्वि

भागीरथीनिर्झरशीकराणां वोढा मुहुः कंपितदेवदारुः यद्वायुरन्विष्टमृगैः किरा
तैरासेव्यते भिन्नशिखंडिबर्हः १५ सप्तर्षिहस्तावचितावशेषाण्यधो विवस्वान्परिव
र्तमानः पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः १६ रामरामराम

सप्तर्षयो मरीचिप्रमुखाः इत्यमरः किरातैरासेव्यते सप्तर्षि अवचय स्वसप्तर्षयः द्विकृतं खेसं
ज्ञा वामित्तिसमासः तेषां हस्तैरवचितेभ्यो लूनेभ्योऽवशेषाणि अग्रवाशिष्टानि शेषो बोधुधाना
धानतात्खोत्रिस्थयात्रोववृज्यत इति केशवः कर्मणि घञ् प्रत्ययः अग्रेऽवशिष्टानि सरांसि

कु॰टी
८

यज्ञांगेति यज्ञानामंगानि तेषां यज्ञसाधनानां सोमलतादीनां यः योनिः उत्पत्तिस्थानं तस्य भावस्त-
त्वमित्युक्ते विष्णुपुराणे यज्ञांगार्थमवसृष्टो हिमवान् बलमिति धरित्रीधरणक्षमं भूधारण-
योग्यं सारं बलं च सारो बले स्थिरांशे चेत्यमरः अवेक्ष्य ज्ञात्वा प्रजापतिः स्वयमेव कल्पितो
व्यवस्थापितो यज्ञभागो यस्मिन् तत् यथोक्तम् सोमस्य राज्ञः कुलेगः सिद्धो ऽथ कुमारो हिमवतो

यज्ञांगयोनित्वमवेक्ष्य यस्य सारं धरित्रीधरणक्षमं च प्रजापतिः कल्पितयज्ञभागं शैला-
धिपत्यं स्वयमन्वतिष्ठत् १७ स मानसीं मेरुसखः पितॄणां कन्यां कुलस्य स्थितये स्थितिज्ञः
मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे १८॥

हस्तीति विष्णुतेरिति भावः शैलानामधिपत्यम् अधिपतित्वं पत्यन्तपुरोहितादिभ्यो यगिति
यक् प्रत्ययः अन्वतिष्ठत् ददौ विस्तारः उक्तं च ब्रह्माण्डपुराणे शैलानां हिमवन्तं च नदीनां सा-
गरं पतिम् गंधर्वाणामधिपत्ये चक्रे चैत्ररथं विभुरिति कुलकं १७ संप्रति कथाप्रस्तावं स
मानसीमिति मेरोः सखा हिमवान् पितॄणां मानसीं कन्यां स्वकुलजां मुनीनामपि माननीयां यो

८

तेउभेब्रह्मवादिन्यौयोगिन्यौचाप्युभेद्विजसत्तमात्तस्मात्अनुरूपांकुलशीलसौंदर्यादिभिःसदृशींमेनां
मेनकांदेवींकुलस्यस्थितयेप्रतिष्ठायैविधिनाशास्त्रोक्तेनापयेमेवरिणीतवान् उपाद्यमः स्वकर
णाइत्यात्मनेपदंतेषांतुमानसीकन्यामेनानाममहागिरेः पत्नीहिमवतोयस्याःपुत्रोमैनाकउ
च्यते१८कालेतियथाकालक्रमेणागच्छताकालेनेत्यर्थः तयामेनाहिमवतोःस्वरूपयोग्यसौंदर
र्यानुगुणेऽथवारूपमेतेनेतिरूपंज्ञानंतद्योग्यप्रशास्त्रानुसारिणीत्यर्थःसुरतप्रसंगेसुर

कालक्रमेणाऽथतयोःप्रवृत्तेस्वरूपयोग्येसुरतप्रसंगेमनोरमंयौवनमुद्वहंत्यागर्भोऽभ
वद्भूधरराजपत्न्याः॥१९॥

तत्क्रमेणप्रवृत्तेसतिमनोरमंयौवनमुद्वहंत्याभूधरराजपत्न्यामेनायाःगर्भोऽभवत्॥१९॥
असूतेतिसामेनानागवधूपभोग्यंनागकन्यापरिणेतारमित्यर्थःअंभोनिधिबद्धसख्यंसमु
द्रकृतमैत्रीकंसख्यमूलंसत्त्वत्राहपक्षच्छिदिपक्षच्छेत्तरिसत्यपिद्विषत्यादिनाविपत्रशत्रौपाके
क्रुद्धेऽपिकुपितेसत्यपिकुलिशक्षतानांवज्रप्रहाराणांसंबंधेवशीवेदनाज्ञानातीतिवेदनाज्ञः

सातोनुपसर्गेतिकः उपपदमितिसमासः

कुटी सत्वमप्यवेदनाज्ञं कुलिशक्षतवेदनानभिज्ञमित्यर्थः साधेहि कल्पविगमकत्वात्समासः पक्षच्छे
९ दो धनं त्वयाग्नेजाणाय प्रारणागमनयोः साम्यमलमिति भावः सर्वपर्वतपक्षच्छेदे पि स्वयमच्छिन्न
पक्ष एवेति मैनाकस्यात्कर्षः ता हरू पुत्रत्वे हिमाद्रेरिति चार्थवमेनावशीनम् पक्षस्य ननभवे
द्वाज्ञानाविज्ञाते न वा विज्ञानोपगच्छे तत्तो धाज्ञः पुत्रिकाधर्मशंकये ति श्वश्रूत्पकोपशिरायनन्नि
वेधात्त्वपार्वत्याः भ्रातृमती त्वं दर्शितमिति वर्णयंति ॥२०॥

असूत सानागवधूपभोग्यं मैनाकमंभोनिधिबद्धस
ख्यम् क्रुद्धेपि पक्षच्छिदि वृत्रशत्रावविवेदनाज्ञं कुलि
शक्षतानाम् ॥२०॥

अथेति अथमेनाकजन्मानंतरं दक्षप्रजापतेः कन्या भवस्य हरस्य पूर्वपत्नी पूर्वभार्या सति।
पतिव्रता सती साध्वी चेत्यमरः सती नाम देवी पितुर्दक्षस्य कर्तुरवमानेन तिरस्कारेण
प्रयुक्ता प्रेरिता सती योगेन योगमार्गेण विसृष्टदेहा त्यक्तदेहा सती जन्मने जन्मने शैलवा
धूं शैलवधूं मेनां प्रपेदे अत्र किल पुरा देवी दक्षाध्वरे सर्वेषु भेजामातृषु सम्प्राप्तेषु विलसि: ९

तें
…मुनिमंत्रिषु सत्सु पदे व साहिंगना नदा तत्र कृतो स्वमंत्रैर्वसो महद्भूमाना वित्र रंपरित्य
…न्याशङ्कयानुवेद्यत्वे सपरमेरे योगाद्भिनाननेदाहे निकन्यानुसंधेया २१॥ हेतिमव्या
कल्याणमूर्ती सती भ. धराणामधिपेन हिमवता समाधिमत्या मेनकायां सम्यक्॥
प्रयोगात् सा हव्यवाहकरणादेः नीतेः अपरिक्षतायाममञ्जुष्यमानायां नीतौ उत्साहगुणेनोत्साह

अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी
सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे २१
सा भूधराणामधिपेन तस्यां समाधिमत्यामुदपादि भव्या
सम्यक्प्रयोगादपरिक्षतायां नीताविवोत्साहगुणेन
संपत्त २२

भव्या कल्याणी सम्यग्वोत्पादि तायदेहे संपन्नतत् कर्मणि लुङ् चिण् भावकर्मणोरिति चिण्
प्रत्ययः २२ प्रसन्नेति प्रसन्ना निर्मला दिशो यत्र तत्र प्रसन्नदिक् पांसुभिर्विविक्तवार
जोरहिता वाता वायवो यस्मिंस्तत्तथोक्तम् तस्याः पार्वत्याः जन्म दिनं तज्जन्म॥

वृ॰ टी॰ दिनं स्थितिशीलाः वृक्षादयः स्थावराः वृक्षादयः स्वेच्छया गमनाशीला विना वरत्वग्रन्थयः जंगम्यते
१० मत्रं गच्छंतीति जंगमा देवतिर्यङ् मनुष्यादयः गमेयङ् नान्तपचाद्यच स्थावराश्च जंगमा
श्चतेषां स्थावरजंगमानां हृदयनामेषु शरीरेषां मिलाय ज्ञानेद्रायणं खस्वनानेतारधुष्यार

व्रतं च हृदि कृपांशु विविक्तवांते धांखस्वनानंतरधुष्यावृत्ति
शरीरिणां स्थावरजंगमानां सखोयतेज्ञः मदिनं नवभूवस्त
तया दुहित्रा सततं सविंत्री स्फुरत्प्रभामंडलया चकासे वेदि
र्यभूमि नवमे घशाहाद् द्विजयारत्नेशलाकयेव २५॥

तयोत्तं नवभूव ३३ तयेति स्फुरत्प्रभामंडलया चकासे तया दुहित्रा सवीत्री जनयित्री स्वदु
वीक्षती त्याद्दिनानाइडागमः श्विदरसाद्रे शजेभूमिर्विङ्करभूमिश्चवदूरस्यागिरेरूत्तं
वस्तासः कालतालकसीमां तेमणे ताल्याकरोमः वेदि निबुधानवमेघशाहाद् द्विजया
पकैः
१०

[illegible]
९